श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरङ्गरामानुजमहादेशिकैः (श्रीमुष्णं आण्डवन्) अनुगृहीतं

# ॥ वीराचल श्रीरामचन्द्र सुप्रभातम्शात् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ वीराचल श्रीरामचन्द्र सुप्रभातम्शात् ॥

कौसल्यासुप्रजाराम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ 1 ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥ 2 ॥

हे अम्ब सर्वजगतां हितमोददात्रि
    विश्वग्विबोध हृदये विबुधेन्द्रवन्द्ये।
प्रग्वि प्रभोरनुमते प्रगुणैकताने
    वीराद्रिनाथदयिते तव सुप्रभातम् ॥ 3 ॥

भक्तार्तिभञ्जनपरे परलोकदात्रि
    मुक्तानुभाव्यमहिमे मुनिनुत्यशीले।
कञ्जप्रभादवदने कमलायताक्षि
    सीते शिवेशदयिते तव सुप्रभातम् ॥ 4 ॥

श्रुत्यन्तसिद्धसुभगौ शुभमूर्तिमन्तौ
    लीलागृहीतवपुषौ ललिताङ्घ्रिपद्मौ।
आद्यन्तशून्यनिखिलागम दम्पती वां
    द्रागद्य हृद्यशुभदं सुखसुप्रभातम् ॥ 5 ॥

श्रीरामराम करुणालय दिव्यशार्ङ्गिन्
    सद्यो विनम्र जनता शरणप्रदायिन्।

सन्नद्ध दानव मदप्रकर प्रमापिन्
    वीराद्रिराघवविभो तव सुप्रभातम् ॥ **6** ॥

राकानिशाकर तिरस्कृतिदक्षवक्त्र
    पाकारिजादिभयद द्युमणिप्रभाव।
नाकादिलोकजनताविनताङ्घ्रियुग्म
    वीराद्रिराघवविभो तव सुप्रभातम् ॥ **7** ॥

विश्वम्भरा वसुमती विमलाग्रगण्या
    वेषं पुपोष सुरभेर्भवदीक्षणाय।
वेदास्स्तुवन्ति भवतो विविधां हि लीलाम्
    वीराद्रिराघवविभो तव सुप्रभातम् ॥ **8** ॥

उत्तुङ्ग मङ्गल शिखा लसदुत्तमाङ्गो
    गङ्गानुषङ्ग विलसत् स्वजटामृगाङ्कः।
अन्ये च निन्युरधिकं शुभवस्तुसङ्घं
    वीराद्रिराघवविभो तव सुप्रभातम् ॥ **9** ॥

श्रीकौशिकादिमुनयश्शिवधातृमुख्याः
    प्रेमानुविद्धहृदयाः प्रसमाप्य सन्ध्याम्।
आयान्ति मुक्तिरतयो हृदयप्रसूनैः
    वीराद्रिराघवविभो तव सुप्रभातम् ॥ **10** ॥

नन्दिस्तु नारदगतिं प्रवलम्ब्य तुङ्गो
    मार्दङ्गिको भवति ते महितार्चनायै।
ऊरूद्भवादि गणिकाः कलयन्ति लास्यं
    वीराद्रिराघवविभो तव सुप्रभातम् ॥ **11** ॥

माध्वीकपानमनसो मधुर प्रलापाः
कीरास्समेत्य नियताः क्रमशस्स्थितास्ते।
श्रीतोरणस्रजि शुभां रचयन्ति नित्यं
वीराद्रिराघवविभो तव सुप्रभातम्॥ **12** ॥

लक्ष्मीकटाक्षनिकटे परिवर्तनात्ते
लब्धोरुनीलगुणका लघुपत्रभृङ्गाः।
शृङ्गार योनि नियमान्निभृतं स्वनन्ति
वीराद्रिराघवविभो तव सुप्रभातम्॥ **13** ॥

मन्दानिलोऽयममराधिपनन्दनस्थान्
मन्दार कुन्दनिवहान्मकरन्दगन्धान्।
बृन्दारकारि विजयिन्वहति प्रणम्रो
वीराद्रिराघवविभो तव सुप्रभातम्॥ **14** ॥

प्राद्यास्त्रयः प्रहृदयाः हरिचित्ततत्त्व
श्रीभक्तिसार शठजित्परकालमुख्याः।
तिष्ठन्ति दास्यरतयो यतिराजवर्याः
वीराद्रिराघवविभो तव सुप्रभातम्॥ **15** ॥

श्रीरङ्गपूतजगति श्रित रक्षणाय
स्वीकृत्य वेषममुकं दशधा विभिन्नम्।
लक्ष्म्यावतेरिथ निजाभिमतानुशक्त्या
वीराद्रिराघवविभो तव सुप्रभातम्॥ **16** ॥

मानमेय सङ्ग्रहं ह्यमानमीनतां गतस्तद्
दानव प्रदूषितन्त्वदाश्च वेदमादरात्त्वम्।
अब्जयोनये तुरङ्ग रूप कन्धर प्रभोद्राग्
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ **17** ॥

धराधरोऽधरीकृतो हि नस्सुधा मुधा भवेद्
दितेस्तथाऽदितेस्सुतेषु शून्यहृत्सु शोभितम्।
दयापरोऽदधास्त्वमच्छकच्छपीयमाश्वहो
नतोऽस्मि वीरशैल राम सुप्रभातमस्तु ते॥ **18**॥

भूतजातगर्भिणीन्तु जातु यातुघातुकस्स
मोदमान मानसः प्रगृह्य लीन एव सिन्धौ।
भूमिदार भूमिदाररूपिणा प्रतिष्ठिता सा
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ **19**॥

प्रलोल कुन्तलं शिशुन्तु भक्तितन्त्र यन्त्रितं
विभीषयंस्थितो हि तस्य दारणाय कैसरम्।
सरोषवेषमञ्जसा पुपोषिथ स्वयं पुरा
नतोऽस्मि वीरशैलराम सुप्रभातमस्तु ते॥ **20**॥

जगत्त्रयं पदत्रयेण माति केशवस्स्वयम्
ततोऽनृणो भवाम्यहन्विति व्यचिन्तयद्बलिः।
त्रिविक्रम त्वमस्य गर्वतक्षणं तदाऽकरोः
नतोऽस्मि वीरशैलराम सुप्रभातमस्तु ते॥ **21**॥

दुष्टवीर्यगर्विधृष्ट भूपवर्ग पाटनं वै
तुष्टहृत्पुरा चकर्थ सप्त सप्त सप्तवारम्।
त्वं कुठारधारयैव रोषराम एव भूत्वा
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ **22**॥

प्रपन्न रक्षण प्रदीक्ष पङ्क्ति कण्ठतक्षक
स्वहस्तकर्तृणप्रयोग सूचितात्मतत्त्व भोः।
सुधर्मकर्ममूलकन्द दुष्प्रमेयपात्रधृङ्
नतोऽस्मि वीरशैल राम सुप्रभातमस्तु ते॥ **23**॥

कोपलाङ्गलोग्रधाटि नम्रहस्तिपत्तनस्य
यामुनादि शिक्षणप्रलोल केलि मानसस्य।
बन्धुबृन्दनाशनेन त्यक्तयुद्धकौतुकस्य
वीरशैल धाम राम तेऽस्तु चारु सुप्रभातम्॥ **24** ॥

व्रजाङ्गनाभिवेष्टितोऽपि यस्स्वयं निरञ्जनो
धनञ्जयापदेशलोकदुग्धगीति निर्झरः।
निहीनभृत्यतादिराजधर्मकर्मकारिणो
नतोऽस्मि वीरशैलराम सुप्रभातमस्तु ते॥ **25** ॥

संस्कृतिं विहाय सर्व धर्म मार्गदूषकान्वै
सप्तितल्लज प्रसादि सुन्दरः कृपाण पाणिः।
भाविकल्किचारुवेष तिष्यजान्हनिष्यसि त्वं
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ **26** ॥

पातुं हि पापधिषणानभवः परेश
कालप्रदेशकरण प्रविदूर सत्वान्।
अर्चावतारविभवानुगृहीतबुद्धिः
वीराद्रिराघवविभो तव सुप्रभातम्॥ **27** ॥

सिद्धाः प्रसिद्धविभवाः शुभसाध्यसङ्घाः
भक्ता हि रक्तहृदयाः पितरस्समेताः।
मुक्ताश्च नित्यविमला मुनिसार्वभौमाः
वीराद्रिराघवविभो तव सुप्रभातम्॥ **28** ॥

प्राप्योऽपि यो हि जगतां सदुपायशेषी
भक्ति प्रपत्तिसुलभः परतत्त्वरूपः।
लक्ष्म्या तया करुणया च निषेवमाणः
वीराद्रिराघवविभो तव सुप्रभातम्॥ **29** ॥

सुप्रभातमिदं पुण्यं यः पठेत् शृणुयादपि।
सुप्रभातं भवेत्तस्य रामचन्द्रकृपाबलात्॥ **30** ॥

॥ इति वीराचल श्रीरामचन्द्र सुप्रभातं समाप्तम्॥